International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 11-12
© 2016 IJSR
www.anantaajournal.com
Received: 18-11-2015
Accepted: 16-12-2015

**डा. राकेश शुक्ल**
व्याख्यातावेद विभाग श्रीमती लाडदेवी शर्मा पंचोली संस्कृत महाविद्यालय बरून्दनी भीलवाड़ा राजस्थान

**Correspondence**
**डॉ. राकेश शुक्ल**
व्याख्यातावेद विभाग श्रीमती लाडदेवी शर्मा पंचोली संस्कृत महाविद्यालय बरून्दनी भीलवाड़ा राजस्थान

# वेदस्यावश्यकता

## डॉ. राकेश शुक्ल

**वेदशब्दार्थः–** 'विदज्ञाने' इतिज्ञानार्थकाद् विद्धातोर्घञि प्रत्यये कृतेवेदइति रूपंनिष्पद्यते। एवंवेदशब्दोज्ञानार्थकः। ज्ञानराशिर्वेदइतिवक्तुं शक्यते। विद् सत्तायाम्, विद् विचारणे, विद्लृ लाभे, विद् चेतनाख्यान–निवासेषुइति धातुभ्योऽपि घञि वेदरूपंनिष्पद्यते। वेदाज्ञानराशित्वात् शाश्वतस्थायिनः, ज्ञाननिधयः, मानवहितप्रापकाः, मनुज–कर्त्तव्य–बोधकाइतिविविधधात्वर्थग्रहणाद् ज्ञायते।

**वेदानांवैशिष्ट्यम्**–वेदार्थानुशीलनाद् ज्ञायते यद् वेदाहिविविधज्ञान–विज्ञान–राशयः, संस्कृतेराधाररूपाः, कर्त्तव्याकर्तव्यावबोधकाः शुभाशुभनिदर्शकाः, जीवनस्योर्यिकाः, विश्वहितसंपादकाः, आचार–संचारकाः, सुख–शान्तिसाधकाः, ज्ञानालोकप्रसारकाः, सत्यतायाः सरणयः कलाकलापप्रेरकाः, आशायाआश्रयाः, नैराश्य–विनाशकाः, चतुर्वर्गावाप्तिसोपानस्वरूपाश्चसन्ति।
वेदानांमहत्त्वविचारचिन्तायांकतिपयेऽनुयोगाः पुरतोऽवतिष्ठन्ते। कतिवेदाः? किंवेदानांमहत्त्वम् ? किंवेदानांवेदत्त्वम्? किं तत्र विशिष्टंज्ञानम्? किंतेषांव्यावहारिकीउपयोगिता ? किंवेदाध्ययनस्य जीवनेउपयोगित्वम् ? किं च समस्याबहुलेजगतिसमस्या–निराकरणत्वंवेदानाम्? किं च वेदानां धार्मिकंराजनीतिकम् आर्थिकंभाषा–वैज्ञानिकम्ऐतिहासिकंकाव्यशास्त्रीयं शास्त्रीयंसामाजिकंसांस्कृतिकं च महत्त्वम्? इत्येवात्र समासतोविव्रियतेप्रस्तूयतेच।

**वैदिकंसाहित्यम्**–मुख्यत्वेनवेदशब्दः ऋग्यजुः सामाथर्वनामभिः प्रचलितानांचतसृणांवेदसहितानांबोधकः। एतेषामेवचतुर्णांवेदानांव्याख्यानभूताब्राह्मणग्रन्थाः सन्ति, येषु वैदिकर्मकाण्डस्य विशदंवर्णनमस्ति। एतेषुवेदानाम् आध्यात्मिकीव्याख्याऽपिप्रस्तूयते। एतेषांपरिशिष्टरूपेणआरण्यक–ग्रन्थाः सन्ति। एषु अध्यात्म विद्याया विवेचनंप्राप्यते। उपनिषत्सु च तस्याएवाध्यात्म विद्यायाश्चर्मोत्कर्षः संलक्ष्यते। वैदिक साहित्य शब्देनसमग्रोऽपिमन्त्र – ब्राह्मण – आरण्यक – उपनिषत् – संग्रहरूपोनिधिर्गृह्यते। अतएव 'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप0 श्रौत0 31) इतिनिर्दिश्यते।

**वेदानां धार्मिकंमहत्त्वम्**– वेदामन्वादिभिः ऋषिभिः परमप्रमाणत्वेनोपन्यस्ताः। 'वेदोऽखिलो धर्ममूलम् (मनुस्मृति 2–6) इति। समुद्घोषयतामनुनासमग्रस्यापिवेदनिधेर्धर्माधाररूपेणप्रतिष्ठाविहिता। मानव स्याखिलं कृत्यजात कर्त्तव्या कर्त्तव्यं वा देवेषु विशदतया निरूप्यते। अतएव वेदाआचार–संहिता–रूपेण प्रमाणी क्रियन्ते।

> यःकश्चित् कस्यचिद् धर्मोमनुनापरिकीर्तितः।
> ससर्वोऽभिहितोवेदेसर्वज्ञामयोहि सः ।। (मनु0 2–7)

सर्वेऽपिविद्वत्तल्लजाभारतीयादार्शनिकाः, आचारशिक्षणप्रवणाः समृतिकाराः, शब्दत्त्वमीमांसादक्षावैयाकरणाः, अन्ये च शास्त्रकारावेदानांपरमप्रामाण्यं प्रतिपदम् उद्घोषयन्ति। अतएवम हर्षिणापतंजलिना कर्त्तव्यत्वेनसमादिश्यते यत् –

**ब्राह्मणेननिष्कारणो धर्मः षडगङो वेदोऽध्येयाज्ञेयश्च।** (महाभाष्य, आन्हिक 1)
स्मृतिकारैर्नएतावतैवविरम्यते, अपितुनिर्दिश्यते यत् ब्राह्मणेनएक–निष्ठयावेदाध्ययनंसंपाद्यम्। एतद् ब्राह्मणस्य परमंतपः। यश्च वेदाध्ययनम् अवमत्य शान्तरेकृतमतिः, स जीवेर्विसपरिवारः शूद्रत्वम् उपायाति।

> वेदमेवसदाऽभ्यस्येत् तपस्प्यन् द्विजोत्तमः।
> वेदाभ्यासोहिविप्रस्य तपः परमिहोच्यते।। मनु0 1–166
> योऽनधीत्य द्विजोवेदमन्यत्र कुरूतेश्रमम् ।।
> सजीवन्नेव शूद्रत्वमाशुगच्छतिसान्वयः ।। मनु 0 2–168

**वेदानांसांस्कृतिकंमहत्त्वम्–** भारतीयाः संस्कृते र्मूल स्त्रोतोऽनु संधीयतेचेत् तर्हिवेदाएवं तन्मूल स्त्रोत स्त्वेनी पतिष्ठन्ति। वेदष्वेव प्रत्नतमा भारतीया संस्कृति र्वर्णिताऽस्ति। भारतीयायाः संस्कृते मूल रूपंवे देष्वे वोप लभ्यते। वेदेष्वे वप्राक्तन भारतीया नांजीवन दर्शनं, कार्यकलापः, आचार–विचाराः, नैतिकंसामाजिकं च चरितं प्राप्यते। मानवा नांविविध कर्त्तव्या दिनिर्धारणं तत्रै वोप लभ्यते। उक्तं च मनुना–

सर्वेषांतु स नामानिकर्माणि च पृथक् पृथक्।
वेदशब्देभ्यएवादौपृथक् संस्थाश्चनिर्ममे।। मनु0 1–12

लोकमान्य–तिलकमहाभागस्तुवेदेषुप्रामाण्यबुद्धिमेवआर्यत्वस्य लक्षणंव्यादिशन्ति–'प्रामाण्यबुद्धिर्वेदेषु', वेदेष्वेवार्याणांसंस्कृतेर्विशुद्धं रूपं। वस्तरशः प्राप्यते। आर्याणां यज्ञेषु दृढ़विश्वासः, ऐश्वरवा देनसहैव बहुदेवातावा दस्यापि। स्वीकरणम्, अनासक्तभावनयाकर्मविधिः, ईश्वरस्य सर्वव्या पकत्वम्, ज्ञानकर्मणोः समन्वयः, भौतिक वाद ंप्रत्या नास्था, पुन र्जन्म निविश्वासः, मोक्षस्य जीवनो द्देश्यत्वं चेत्यादितथ्या निवेदेष्वेव प्राप्यन्ते। विश्वसंस्कृतेरै तिह्यंगवे षितंचेत् तर्हिवेदा एवं सर्व प्रमुखत्वेन दृष्टिपथम् अवतरन्ति। अस्मिन् संसारे संस्कृतेः सभ्यताया श्चकथमिव विकासोऽभूदित्य र्थवेदा नुशीलनम् अनिवार्यम् आपद्यते। तत एवं क्रमिक विकास्य प्रक्रियाप्राप्यते। अतएव यजुर्वेद प्राप्यते–'साप्र थमा संस्कृति र्विश्ववारा' (यजु0 7–14), वैदिकीसंस्कृतिः प्रथमासंस्कृतिरासीत्।

**शास्त्रीयंमहत्त्वम्**–वेदानां शास्त्री यंसर्व तोमुख्यं वर्तते। सर्वज्ञानमयोहि सः' इतिवदत्ता मनुना वेदानां सर्वे विधज्ञान निधानत्वम् उरीकृतम् । यदि विचार दृशा समीक्ष्यत `तर्हिवेद `षुबी जरूपेण दार्शनिकाः सिद्धान्ताः, राजनीतिः, समाजशास्त्रम्, अध्यात्मम्, मनोविज्ञानम्, आयुर्वेदः, गणितम्, अर्धशास्त्रम्, नाट्यशास्त्रम्, काप्यशास्त्रम्, कामशास्त्रम्, अश्याश्च विविधाः, कलास्तत्र तत्र वर्ण्यन्ते। वैदिकंदर्शनम् अध्यात्म तत्त्वं चोपादाय उपनिष दोविविधा निदर्शनानि च प्रवृत्तानि। तथ्यमेतद् निदर्शरूपेण नाट्य शास्त्र कृतो भरतमुने र्विवेचनेन विशदी भवति–

जग्राहपाठ्यम् ऋग्वेदात् सामभ्योगीतमेवच।
यजुर्वेदादभिनयान् रसानाथर्वणादपि।। नाट्यशास्त्र 1–17

**नैतिकंमहत्त्वम्** –वेदानाम् आचारशिक्षा–दृष्ट्या, नैतिक–दर्शन रूपेण चातीवम हत्त्वंवर्तते। कर्त्त व्योद् बोधन रूपेणतेषा ंपरमं प्रामाण्यं वर्तते। किंकर्म, किम् अकर्म तिचिन्ताया वेदाएवादर्शरूपेण प्रस्तूयन्ते। अतएवम नुनोच्यते–

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधंप्राहुः साक्षात् धर्मस्य लक्षणम्।। मनु0 2–12
श्रुतिस्मृत्युदितं धर्मम् अनुतिष्ठन् हिमानवः।
इहकीर्तिमवाप्नोतिप्रेत्य चानुत्तमंसुखम्।। मनु0 2–9

धर्मचिन्तायांकर्त्तव्यविचारणे च वेदाः परमप्रमाणभूताः सन्ति।